दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-259 | 1 | जुलाई 11, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढकृष्णैकादशीद्वादशी
आषाढः 27 प्रविष्टांशः मङ्गलमयः भवेत्

2 सेवारतशिक्षकेभ्यः टेट-परीक्षा-उत्तीर्णतायै २०२८ पर्यन्तं समयः, शिक्षाशालानिदेशालयस्य निर्देशः

3 १२८ तमवर्षस्य दुर्लभे ग्रामोफोन-अभिलेखे (रिकॉर्ड) गुञ्जितं वन्दे मातरम्, उपराष्ट्रपतिना आभासीय-माध्यमेन कार्यक्रमः सम्बोधितः

5 फीफा विश्व कप: स्पेन-फ्रांस देशौ सेमीफाइनल-चक्रे प्रविष्टौ

## प्रधानमन्त्री नरेन्द्रमोदी न्यूज़ीलैण्ड-देशस्य द्विदिवसीययात्रायाम् आक्लैण्ड-नगरं सम्प्राप्तवान्




प्रधानमन्त्री नरेन्द्रमोदी स्वस्य तिसृणां राष्ट्राणां यात्रायाः अन्तिमे चरणे आक्लैण्ड-नगरं सम्प्राप्तवान्, यत्र न्यूज़ीलैण्ड-देशस्य प्रधानमन्त्रिणा क्रिस्टोफर् लक्सन् इत्यनेन भव्यं औपचारिकं च स्वागतं विहितम्। आक्लैण्ड-विमानस्थानके रेड्-कार्पेट्-इत्यत्र प्रधानमन्त्रिणा लक्सन्-वर्येण श्रीमोदिनः व्यक्तिगतरूपेण स्वागतम् कृतम्। प्रधानमन्त्रिणं मोदिनं टर्मेक् इत्यत्र औपचारिकं स्वागतम् अददात्, यत्र भारतस्य न्यूजीलैण्ड-देशस्य च सशस्त्रसेनायाः प्रतिनिधयः उपस्थिताः आसन्। श्रीमोदी न्यूज़ीलैण्ड-देशस्य स्वकीयेन समकक्षीयेण क्रिस्टोफर् लक्सन् इत्यनेन सह वार्तालापं करिष्यति। उभौ नेतारौ समग्रस्य द्वैपाक्षिकसम्बन्धस्य समीक्षां करिष्यतः, यस्मिन् विगतद्वयोः वर्षयोः विशेषतः व्यापार-वाणिज्य-रक्षादि क्षेत्रेषु महती प्रगतिः अभवत्। कस्यापि भारतीयप्रधानमन्त्रिणः न्यूज़ीलैण्ड-देशस्य यात्रा चत्वारिंशत् वर्षेषु प्रथमा यात्रा भविष्यति। श्रीमोदी प्रमुखेभ्यः उद्यमिभ्यः, क्रीडकेभ्यः च सह संवादं साधयिष्यति। भारत-न्यूजीलैण्ड-देशयोः मध्ये विद्यमानस्य जनानां मध्ये दृढसम्बन्धस्य प्रदर्शनपूर्वकं, प्रधानमन्त्री अस्यां यात्रायाम् भारतीय-प्रवासिनां विशालसमुदायम् अपि सम्बोधयिष्यति। इतः प्राक्, प्रधानमन्त्रिणा नरेन्द्रमोदिना आस्ट्रेलिया-देशस्य ऐतिहासिकं, उच्चस्तरीयं राज्यपर्यटनं आधिकारिकरूपेण समापितम्, येन भारत-आस्ट्रेलिया-समग्र-सामरिकसहभागित्वस्य कृते भविष्यप्रतिरोधकं प्रारूपं निर्मितम्। प्रधानमन्त्री नरेन्द्रमोदी आस्ट्रेलिया-देशस्य सर्वकाराय, नागरिकेभ्यः, आस्ट्रेलिया-देशस्य प्रधानमन्त्रिणे एन्थोनी अल्बनीस्-वर्याय च स्वस्य यात्रायाः समापन-समये स्नेहपूर्ण-आतिथ्याय कार्तज्ञं प्रकटितवान्। आस्ट्रेलिया-यात्रायाः समाप्तेः अनन्तरं सामाजिक-पटले श्रीमोदी अवदत् यत् अस्याः यात्रायाः परिणामेन भारत-आस्ट्रेलिया-सहभागित्वम् इतोऽपि सुदृढं जातम् अपि च विविधक्षेत्रेषु सहकारस्य नूतनानि मार्गाणि उद्घाटितानि ।

## गोवा-सर्वकारेण देशे प्रस्तावितायं एकः देशः, एकं निर्वाचनम् इत्यस्मै अभियानाय स्वकीयं पूर्णं समर्थनं दत्तम्



गोवा-सर्वकारेण देशे प्रस्तावितायं एकः देशः, एकं निर्वाचनम् इत्यस्मै अभियानाय स्वकीयं पूर्णं समर्थनं दत्तम्। एतत् समर्थनं गोवाराज्ये विचार-विमर्शार्थं समागतायाः संयुक्त संसदीय समित्याः सम्मुखं उपस्थापितम्। राज्यस्य मुख्यमन्त्री डॉ. प्रमोद-सावन्तः अस्मिन् विषये प्रावोचत् यत्, देशे एकदैव सर्वत्र निर्वाचनेन वारं वारं जायमानानां निर्वाचन-सम्बद्ध-प्रक्रियाणां स्थाने सर्वकाराः विकासात्मक-कार्येषु अधिकं ध्यानं केन्द्रयितुं शक्ष्यन्ति।

## सर्वकारः देशे E85 इन्धनं प्रवर्त्तयितुं योजनां निर्माति- केन्द्रीय-पेट्रोलियम-प्राकृतिक गैस-मन्त्री




केन्द्रीय-पेट्रोलियम-प्राकृतिक गैस-मन्त्री हरदीपसिंह-पुरी अवदत् यत्, सर्वकारः देशे E85 इन्धनं प्रवर्त्तयितुं योजनां निर्माति। सामान्य-E20-पेट्रोल-इन्धनात् प्रतिलीटर-मितात्मकः प्रायः विंशति-रूप्यकाणि यावत् अल्पार्घयुतः भविष्यति। मन्त्रिणा स्पष्टीकृतं यत्, अस्य E85 इतीन्धनस्य उपयोगः केवलं तादृशेषु विशिष्ट-वाहनेष्वेव भविष्यति, यानि मुख्यरूपेण अस्य इन्धनस्य कृते एव विनिर्मितानि सन्ति। एकया निज-वार्ता-वाहिन्या सह संवादे पेट्रोलियम-मन्त्रिणा प्रतिपादितं यत्, सर्वकारस्य अस्य प्रस्तावित प्रयासस्य मुख्योद्देश्यं उपभोक्तृभ्यः आर्थिक-साहायता प्रदानं सहैव देशे सर्वकारस्य एथेनॉल मिश्रण कार्यक्रमः तीव्रगत्या अग्रे वर्धेत इति वर्तते।

## केन्द्रसर्वकारेण मादकद्रव्याणां नियमेषु संशोधनं कृत्वा अधिक-मद्ययुक्तानाम् औषध-सूत्रीकरणानां विनियमनं विहितम्

केन्द्रसर्वकारेण अधिक-मद्यसार-युक्त-औषधीनां निर्माणस्य विक्रयणस्य च नियन्त्रणं विधातुं पञ्चचत्त्वारिंशदधिक-एकोनविंशतितमायां औषध-नियमावल्यां प्रमुखाः परिष्काराः कृताः। केन्द्रीय-स्वास्थ्य-एवं-परिवार-कल्याण-मन्त्रालयेन एथिल अल्कोहल युक्त-ओषध-स्वरूपेभ्यः पूर्वदत्ता अनुज्ञप्ति-मुक्तिः अधुना समापिता। मन्त्रालयस्य अधिसूचनानुसारं, त्रिंशत्- मिलिलीटर् इत्यतः अधिकमात्रायां स्थिताः सर्वाः ओषधयः, यासु एथिल-मद्यसारस्य मात्रा द्वादश प्रतिशतं उत वा ततोऽप्यधिकं वर्तते, ताः इतः परं अनुसूची-के इत्यस्यान्तर्गतं प्राप्तायाः मुक्तेः बहिः भविष्यन्ति। एतादृशाणां औषधीय-उत्पादानां कृते ओषधि-एवं-सौन्दर्यप्रसाधन-अधिनियमः चत्त्वारिंशदधिक-एकोनविंशतितमः इत्यस्यान्तर्गतं वैधानिक अनुज्ञप्तिः प्राप्तव्या भविष्यति। अनेन संशोधनेन मद्ययुक्त-औषधीनां प्रचलने नियामक निरीक्षणं प्रगाढं भविष्यति, सहैव एतासाम् औषधीनां वितरणं केवलं नियन्त्रित भेषज-आपूर्ति-शृङ्खलायाः माध्यमेन एव सुनिश्चितं भविष्यति

## सुभाषितम्

**आयुर्वित्तं गृहच्छिद्रं,**
**मन्त्रमैथुनभेषजम्।**
**दानमानापमानं च,**
**नवैतानि सुगोपयेत्।।**

अर्थात्- अपनी आयु, आर्थिक स्थिति तथा परिवार के मतभेदों की जानकारी, मन्त्रों का उपयोग, मैथुन, औषधियों का सेवन, दान देना, किसी व्यक्ति का सम्मान या अपमान करना, ये नौ कार्य सदैव बाहरी व्यक्तियों से गुप्त ही रहने चाहिए।







## पीयूषगोयलेन दिल्ल्यां राष्ट्रिय-उत्पादकता-परिषदः, वाणिज्य-विभागस्य च अधिकारिभिः सह समीक्षा-सभायाः अध्यक्षता

वाणिज्य-उद्योग-मन्त्रिणा पियूष गोयलेन नवदिल्ल्यां राष्ट्रिय-उत्पादकता-परिषदः, उद्योग-प्रोत्साहन-विभागस्य, आन्तरिक-व्यापार-विभागस्य, वाणिज्य-विभागस्य च अधिकारिभिः सह समीक्षा-सभायाः अध्यक्षता कृता। सामाजिकान्तर्जालीये पटले श्रीगोयलः अवदत् यत्, अन्तर-विभागीय-सहयोगस्य परिष्कारे, संस्थागत-क्षमतानां सुदृढीकरणे, उत्पादकता सेवा-वितरणस्य च वर्धनाय सर्वोत्तमपद्धतीनां स्वीकरणे च चर्चा केन्द्रिता आसीत्।

# सेवारतशिक्षकेभ्यः टेट-परीक्षा-उत्तीर्णतायै २०२८ पर्यन्तं समयः, शिक्षाशालानिदेशालयस्य निर्देशः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे कार्यरतेभ्यः शिक्षकेभ्यः एका महती समाश्वासिका वार्ता सम्मुखीभूता अस्ति। शिक्षकपात्रतापरीक्षाम् उत्तीर्णं कर्तुं न शक्नुवद्भ्यः शिक्षकेभ्यः, सर्वोच्चन्यायालयस्य निर्देशानुसारं, स्वयोग्यतां पूर्णं कर्तुं अतिरिक्तः समयः प्रदत्तः अस्ति। प्रारम्भिकशिक्षाशालानिदेशालयेन अस्मिन् विषये सर्वान् जनपद-उपनिदेशकान् (प्रारंभिक शिक्षा) प्रति निर्देशान् प्रसार्य तादृशानां शिक्षकाणां विवरणं याचितम्, टेट-योग्यताप्राप्तये समयसीमा च वर्धयित्वा ३१ अगस्त २०२८ पर्यन्तं कृता अस्ति।

**सर्वोच्चन्यायालयस्य आदेशः वर्धिता समयसीमा च-**

शिक्षाशालानिदेशालयेन प्रसारितेन पत्रेण अनुसारं, सर्वोच्चन्यायालयः पुनर्विचारयाचिकायाः सङ्ख्या ५३४३४/२०२५ इत्यस्यां पारितेन एकेन महत्तरेण आदेशेन, कार्यरतानां शिक्षकाणां कृते टेटपरीक्षा- उत्तीर्णतायै पूर्वं निर्धारितां वर्षद्वयस्य अवधिं वर्धयित्वा वर्षत्रयं कृतवान्। अस्य साक्षात् अर्थः अयम् अस्ति यत् सम्प्रति सम्बद्धैः शिक्षकैः ३१ अगस्त २०२८ पर्यन्तम् अनिवार्यरूपेण टेट-परीक्षा उत्तीर्णाकर्तव्या भविष्यति। एषः निर्णयः तेषां शिक्षकाणां कृते अतीव महत्त्वपूर्णः अस्ति ये केषाञ्चित् कारणानां वशात् पूर्वं निर्धारितायां समयसीमायां परीक्षाम् उत्तीर्णं कर्तुं न शक्तवन्तः आसन्।

**जनपद-उपनिदेशकान् प्रति निर्देशः- सूच्याः निर्माणाय आदेशः**

अस्य नूतननिर्देशस्य पालने, निदेशालयेन सर्वान् जनपद-उपनिदेशकान् आदेशितं यत् ते स्व- स्वजनपदेषु कार्यरतानां तादृशानां सर्वेषां टीजीटी- शिक्षकाणां (कला, गणित, विज्ञानं च) सूचीं सप्ताहाभ्यन्तरे प्रेषयेयुः, यैः अद्यापि टेट-परीक्षा न उत्तीर्णा। अस्यां सूच्यां शिक्षकस्य पूर्णं नाम, तेषां पदम्, नियुक्तितिसृष्टिः (नियुक्ति तिथिः), सम्बद्धस्य विद्यालयस्य च विस्तृतं विवरणं समाविष्टं कर्तुं निर्देशः दत्तः अस्ति। एषा सूचना शिक्षकाणां वर्तमानस्थितेः मूल्याङ्कनाय भविष्यत्-योजनानां निर्माणाय च सहायिका भविष्यति।

## प्राचार्याणां मुख्याध्यापकानां च भूमिका

सर्वैः प्राचार्यैः मुख्याध्यापकैः च अपि अस्याः अनिवार्यशर्तुः विषये स्वाधीने कार्यरताः शिक्षकाः सूचनीयाः, एतद् सुनिश्चितं कर्तव्यं यत् ते निर्धारित- समयसीमाभ्यन्तरे टेटपरीक्षाम् उत्तीर्णां कुर्युः। एतत् पादक्षेपं सर्वान् शिक्षकान् अस्मात् महत्तरात परिवर्तनात् परिचाययिष्यति, ते च स्वसज्जायां चित्तं एकाग्रं करिष्यन्ति।

## विशेष-टेट-परीक्षाणाम् आयोजनाय विचारः

शिक्षकेभ्यः टेट-परीक्षा-उत्तीर्णतायै साहाय्यं प्रदातुं उद्देश्येन, शिक्षाशालानिदेशालयेन हिमाचलप्रदेश- विद्यालय- शिक्षा- परिषद् इत्यस्याः समीपे अपि अनुरोधः कृतः यत् ते न्यायालयस्य निर्देशानुरूपं, कार्यरतानां शिक्षकाणां कृते वर्षे न्यूनतमातिन्यूनं वारद्वयं विशेष-टेट-परीक्षायाः आयोजनाय सम्भावनासु विचारं कुर्युः। एतादृशैः विशेषायोजनैः शिक्षकाः स्वपात्रतां प्राप्तुम् अधिकान् अवसरान् लप्स्यन्ते, ते च समयं प्राप्य इमाम् आवश्यकतां पूर्णां कर्तुं शक्ष्यन्ति।

# संसदीय-कार्य-राज्यमन्त्री अर्जुनराम मेघवालः सहैव डॉ. एल. मुरुगनः इत्येतौ संसद भवन-परिसरे आगामिनः वर्षाकालीन सत्रस्य सज्जतायाः विस्तृत समीक्षां कृतवन्तौ



संसदीय-कार्य-राज्यमन्त्री अर्जुनराम मेघवालः सहैव डॉ. एल. मुरुगनः इत्येतौ संसद भवन-परिसरे आगामिनः वर्षाकालीन सत्रस्य सज्जतायाः विस्तृत समीक्षां कृतवन्तौ। संसदः इदं महत्त्वपूर्णं सत्रम् अस्मिन्नेव मासे विंशति-दिनाङ्कादारभ्य आगस्ट-मासस्य त्रयोदश-दिनाङ्क यावत् प्रचलिष्यति। सामाजिक सञ्जालीय-तन्त्रांशे सूचयन् श्रीमेघवालः अवदत् यत्, अस्मिन् अवसरे आगामि-सत्रे प्रस्तुतीकरणाय निर्धारितानां प्रमुखाणां वैधानिक कार्याणां सूक्ष्मा समीक्षा विहिता, सहैव सत्रस्य सुचारु-सञ्चालनाय सम्बन्धितेभ्यः अधिकारिभ्यः आवश्यकाः दिशानिर्देशाः अपि प्रदिष्टाः।

# CBSE Schools Himachal: २० जुलाई दिनाङ्के भविष्यति महाविपुलः निर्णयः, २५०० छात्राणां विद्यालयत्यागविषये सर्वकारः गम्भीरः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य सीबीएसई विद्यालयेषु सेवारतानां शिक्षकाणां नियुक्तिं परितः दीर्घकालात् प्रचलन्त्यां प्रक्रियायां सम्प्रति शीघ्रमेव निर्णयस्य आशा वर्तते। शिक्षा मन्त्री रोहितठाकुरः शुक्रे राज्यसचिवालये पत्रकारैः सह सम्भाषणकाले अकथयत् यत् अस्मिन् विषये गहिता मन्त्रिमण्डल-उपसमितिः (कैबिनेट सब कमेटी) स्वकीयं प्रतिवेदनं सर्वकाराय समर्पितवती अस्ति। अधुना २० जुलाई दिनाङ्के प्रस्तावितायां मन्त्रिमण्डलस्य गोष्ठ्यां अस्मिन् विषये अन्तिमः निर्णयः स्वीकरिष्यते। शिक्षामन्त्रिणा विज्ञापितं यत् मन्त्रिमण्डल- उपसमित्या स्वप्रतिवेदने हिमाचलप्रदेश- विद्यालय- शिक्षापरिषद् द्वारा आयोजितपरीक्षायाः योग्यतासूच्याः (मेरिट) आधारेण सेवारतशिक्षकान् सीबीएसई-विद्यालयेषु नियुक्तिं प्रदातुम् अनुशंसा कृता अस्ति। सर्वकारः अस्मिन् प्रतिवेदने विचारानन्तरम् अन्तिमनिर्णयं नेष्यति।

तेन उक्तं यत् सीबीएसई-विद्यालयेषु शिक्षकाणां नियुक्तौ विलम्बस्य साक्षात् प्रभावः छात्राणां नामाङ्कने अभवत्। पर्याप्तानां शिक्षकाणाम् उपलब्धत्वाभावात् प्रायः २५०० छात्राः एतान् विद्यालयान् त्यक्त्वा अन्येषु शिक्षणसंस्थानेषु प्रवेशं गृहीतवन्तः। सर्वकारः एतां स्थितिं गम्भीरतया पश्यन् अस्ति, शीघ्रमेव च समाधानं प्राप्तुं प्रयतते। रोहित ठाकुरः अवदत् यत् प्रदेशे वर्षाकाले (मानसून) निरन्तरं भवन्तीं वृष्टिं दृष्ट्वा सर्वकारेण सर्वान् जनपद-उपायुक्तान् (जिला उपायुक्त) स्थानीय- परिस्थित्यनुसारं विद्यालयान् अन्यान् शिक्षणसंस्थानान् च स्थगयितुम् (पिधातुम्) अधिकारः दत्तः अस्ति। तेन स्पष्टीकृतं यत् यदि प्रतिकूलर्तुकारणात् कस्मिंश्चित् जनपदे शिक्षणसंस्थानानि पिधितानि क्रियन्ते, तर्हि तस्यां अवधौ शिक्षकाणां शिक्षणेतरकर्मचारिणां च कृते अपि अवकाशः भविष्यति।

# हिमाचलप्रदेशे बृहत् प्रशासनिकपरिवर्तनम्, १७ आई.ए.एस. (IAS), २२ एच.ए.एस. (HAS) अधिकारिणां च स्थानान्तरणम्




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशसर्वकारेण राज्ये महता स्तरेण प्रशासनिकं परिवर्तनं विहितम्। मुख्यसचिवस्य कमलेशकुमारपन्तस्य पक्षतः प्रसरितादेशानुसारं सिविल-सेवा- बोर्ड इत्यस्य अनुशंसया १७ आई. ए. एस., २२ एच.ए.एस. अधिकारिणां च स्थानान्तरणं, नियुक्ति-आदेशाश्च प्रसारिताः।

## प्रमुखाणाम् आई.ए.एस. अधिकारिणां दायित्वानि

**ओंकारचन्दशर्मा-** अतिरिक्त- मुख्यसचिवः (जनजातीय- विकासः) इत्यस्मै अतिरिक्त- मुख्यसचिव- परिवहनपदस्य दायित्वं प्रदत्तम्। **आर. डी. नजीमः-** अतिरिक्त- मुख्यसचिवः (खाद्य- नागरिक- आपूर्तिः) अधुना अतिरिक्त- मुख्यसचिव- गृह एवं सतर्कता विभागस्य कार्यं पश्यति। **देवेशकुमारः-** प्रधानसचिवः (शहरीविकासः) अधुना प्रधानसचिव- वित्त, योजना, अर्थशास्त्र- साङ्ख्यिकी तथा पशुपालन विभागस्य प्रभारं प्राप। सः लोकनिर्माणविभागस्य प्रभारमपि धारयिष्यति। **एम. सुधा देवी-** प्रधानसचिवः (स्वास्थ्यम्) अधुना प्रधानसचिव-वन एवम् उद्योगपदं सम्भालेति, सा कार्मिकविभागस्य अतिरिक्तप्रभारं धारयन्ती स्थास्यति।आशीषसिंहमारः- मुख्यमन्त्रिणः सचिवः अधुना स्वास्थ्य एवं परिवारकल्याणविभागस्य सचिवपदस्य अतिरिक्तप्रभारं प्राप।डा. **यूनुसः-** उद्योगनिदेशकपदात् अधुना राज्यकर एवं आबकारी-विभागस्य सचिवः नियुक्तः। **राकेशकुमारप्रजापतिः-** ऊर्जा- निदेशकपदात् अधुना पर्यटन एवं नागरिकउड्डयन-निदेशकपदे नियुक्तः जातः।

## प्रमुखाणाम् एच.ए.एस. (HAS) अधिकारिणां नियुक्तयः

**सचिन कंवलः-** मुख्यमन्त्रिणः अतिरिक्तसचिवः अधुना शिमला- नगरनिगमस्य आयुक्तः (MC Commissioner) विहितः। **भूपेन्द्रकुमारः-** शिमला- नगरनिगमायुक्तात् निष्कास्य सामान्य-उद्योग-निगमस्य प्रबन्धनिदेशकः (MD) नियुक्तः। **ज्ञानसागरनेगी-** शिमलायां अतिरिक्त- मण्डलाधिकारी (ADM प्रोटोकॉल) नियुक्तः। एकता कप्टा- सिरमौरमण्डले अतिरिक्त- मण्डलाधिकारी (विकास) सह- परियोजना- निदेशिकारूपेण नियुक्ता। **सञ्जयः-** मुख्यमन्त्रिणः अतिरिक्त- प्रधान- निजीसचिवपदस्य दायित्वं प्राप्तवान्। अनेन सहैव बिलासपुर- सोलन- करसोग- उदयपुरादिषु उपमण्डलेषु अपि बहवः उपमण्डलाधिकारिणः, अन्ये च प्रकाशकीय- अधिकारिणः परिवर्तिताः, येन राज्यप्रशासने नूतना व्यवस्था स्थापिता।

# १२८ तमवर्षस्य दुर्लभे ग्रामोफोन-अभिलेखे (रिकॉर्ड) गुञ्जितं वन्दे मातरम्, उपराष्ट्रपतिना आभासीय-माध्यमेन कार्यक्रमः सम्बोधितः





## भारतीय-उच्च-अध्ययन-संस्थाने सुरक्षितः दुर्लभः ग्रामोफोन-अभिलेखः, राज्यपालः कविन्द्रगुप्तः प्रदर्शिनी-शुभारम्भं कृतवान्

**हिमसंस्कृतवार्ताः — शिमला।** भारतीय-उच्च-अध्ययन-संस्थाने (आईआईएएस) शुक्रवासरात् आरब्धायां 'वन्दे मातरम् : एका यात्रा' इति स्थायिप्रदर्शिन्यां स्वतन्त्रता-आन्दोलनेन सम्बद्धाः दुर्लभाः ग्रामोफोन-अभिलेखाः, ऐतिहासिकाः प्रलेखाः (दस्तावेज), पुरालेखाश्च प्रथमतया एकस्मिन् एव स्थले प्रदर्शिताः सन्ति। उद्घाटनोत्तरं हिमाचलप्रदेशस्य राज्यपालेन कविन्द्रगुप्तेन प्रदर्शिनी अवलोकिता, दुर्लभे ग्रामोफोन-अभिलेखे च सुरक्षिता वन्दे मातरम् इति गीतस्य ऐतिहासिकी ध्वन्यङ्कना (रिकॉर्डिंग) अपि श्रुता। प्रदर्शिन्यामस्यां १९२८ तमवर्षस्य दुर्लभः ग्रामोफोन-अभिलेखः, आरम्भिक्यः ध्वन्यङ्कनाः, विविधाः अभिलेख-सूचकाः (रिकॉर्ड लेबल), ऐतिहासिकाः प्रलेखाश्च प्रदर्शिताः। २७ विषयगत-पट्टिकानां (पैनल) माध्यमेन वन्दे मातरम् इति गीतस्य यात्रा क्रमशः दर्शिता अस्ति। प्रदर्शिन्याम् एतादृशाः प्रलेखाः अपि स्थापिताः, ये तस्य कालस्य ध्वन्यङ्कन-प्रविधेः (तकनीक) गीतस्य च व्यापकप्रसारस्य सूचनां ददति।
एते अभिलेखाः प्रलेखाश्च सुदीर्घकालं यावत् सङ्गृह्य संरक्ष्य च प्रथमतया अनेन रूपेण प्रदर्शिताः सन्ति। 'सेंटर फॉर ग्रामोफोन एंड एलाइड स्टडीज' इत्यस्य संस्थापकेन अखिलेशझा इत्यनेन ज्ञापितं यत् प्रदर्शिन्यां वन्दे मातरम् इति गीतस्य आरम्भिक्यः अत्यन्त दुर्लभाः च ग्रामोफोन-ध्वन्यङ्कनाः अपि प्रदर्शिताः सन्ति। एकशताब्द्याः अपि अधिकाः पुरातनाः एते अभिलेखाः तस्य कालस्य मूल-श्राव्य-प्रमाणरूपेण (ऑडियो प्रमाण) अद्यापि सुरक्षिताः वर्तन्ते। आई.आई.ए.एस. निदेशकः प्रो. हिमांशुकुमारचतुर्वेदी अवदत् यत् एषा प्रदर्शिनी आगामि-षण्मासान् यावत् सर्वसामान्यानां कृते उद्घाटिता स्थास्यति। अनेन साकं आयोज्यमानायां त्रिदिवसीयायाम् अन्तर्राष्ट्रिय-सङ्गोष्ठ्यां ऐतिहासिकाः, शोधकर्तारः, शिक्षाविदश्च वन्दे मातरम्, दुर्लभाः ग्रामोफोन-अभिलेखाः, भारतीयस्वतन्त्रता आन्दोलनस्य च विविधानां पक्षाणाम् उपरि चर्चां विधास्यन्ति।

## प्रदेशस्य संस्कृतिं दर्शयन्ति काङ्गड़ा-कलम-शैल्याः १४ चित्राणि

प्रदर्शिन्यां दुर्लभ-काङ्गड़ा-कलम-शैल्याः १४ विशेषचित्राणि अपि प्रदर्शितानि सन्ति। एतेषु चित्रेषु प्रदेशस्य संस्कृतेः ग्राम्यजीवनस्य च विविधाः चरणाः कलात्मकरूपेण दर्शिताः। चित्रेषु गीतस्य रचना, राष्ट्रियचेतनायाः प्रसारः, स्वतन्त्रतासङ्ग्रामे अस्य भूमिका च दृश्यात्मकरूपेण अङ्किताः सन्ति। पारम्परिक-काङ्गड़ा-चित्रकला-शैल्यां सज्जीकृताः एताः कृतयः प्रदर्शिनीं ऐतिहासिकत्वेन सह कलात्मकम् आयामम् अपि यच्छन्ति, दर्शकेभ्यः च चित्राणां माध्यमेन इतिहासम् अवगन्तुम् अवसरं प्रददति।

## पटेलेन शताधिकाः रियासताः एकस्मिन् सङ्गठिते गणतन्त्रे परिवर्तिताः - उपराष्ट्रपतिः

प्रतिकूल-ऋतुकारणात् उपराष्ट्रपतिः सी.पी. राधाकृष्णन् महोदयः शिमलां प्राप्तुं न अशक्नोत्। तेन आभासीय-माध्यमेन कार्यक्रमः सम्बोधितः। तेन प्रोक्तं यत् देशः अस्मिन् वर्षे वन्दे मातरम् इति गीतस्य १५० तमं वर्षवर्द्धनम् तथा च सरदार-वल्लभभाई-पटेलस्य १५० तमीं जयन्तीं मानयति। एतादृशाः अवसराः केवलम् इतिहासस्मरणार्थं न सन्ति, अपितु तस्य मूल्यानाम् आदर्शानां च पुनः आत्मसात्करणस्य अवसराः अपि सन्ति। तेन भारतीय-उच्च-अध्ययन-संस्थानस्य प्रशंसा कृता। एतादृशानि आयोजनानि राष्ट्रियचिन्तनाय नूतनां दिशं प्रयच्छन्ति। तेन कथितं यत् नवाचाराः किमपि राष्ट्रं समृद्धं विधातुं शक्नुवन्ति, परन्तु कस्यचित् महान् राष्ट्रस्य वास्तवी आधारशिला तस्य विचारेषु एव तिष्ठति। स्वतन्त्रता-आन्दोलने वन्दे मातरम् इति गीतेन विविधाः भाषाः, क्षेत्राणि, धर्माः, सामाजिकपृष्ठभूमयश्च एकात्मकरूपेण सम्बद्धाः। सरदार-वल्लभभाई-पटेलं प्रति श्रद्धाञ्जलिं प्रच्छन् उपराष्ट्रपतिः अवदत् यत् वन्दे मातरम् गीतेन राष्ट्रस्य जन्म प्रेरितं, यत्रैव सरदारपटेलेन शताधिकाः रियासताः एकस्मिन् सङ्गठिते गणतन्त्रे परिवर्तिताः।

## भारतीय-सङ्घवादस्य सुदृढः प्रवक्ता आसीत् पटेलः - राज्यपालः

राज्यपालः कविन्द्रगुप्तः अवदत् यत् सरदारपटेलः केवलं भारतस्य राजनैतिक-एकीकरणस्य शिल्पी नासीत्, अपितु भारतीय-सङ्घवादस्य (Federalism) सुदृढः प्रवक्ता अपि आसीत्। तेन प्रोक्तं यत् भारतस्य भाषायिकी, सांस्कृतिकी, सामाजिकी च विविधा एव तस्य सङ्घीयप्ररूपम् इत्यस्य महती शक्तिः अस्ति। सरदारपटेलस्य सम्प्रदानं (योगदान) केवलं ५६० तः अधिकानां रियासतानाम् एकीकरणं यावत् सीमितं नासीत्, अपितु तेन एकस्य सुदृढस्य सङ्गठितस्य च भारतस्य आधारशिला स्थापिता। आई.आई.ए.एस. निदेशकेन प्रो. हिमांशुकुमारचतुर्वेदिना कथितं यत् सरदारपटेलेन आधुनिकभारतस्य प्रशासनिक-सङ्घीयव्यवस्थायै सुदृढः आधारः प्रदत्तः तस्य विचाराश्च अद्यापि प्रासङ्गिकाः सन्ति।
आई.आई.ए.एस. अध्यक्षा प्रो. शशिप्रभाकुमारा संस्कृतश्लोकेन सह स्वागतभाषणस्य आरम्भं कुर्वती अवदत् यत् भारतस्य एकता सहस्रवर्षपुरातन्याः सांस्कृतिकपरम्परायाः देयता अस्ति। कार्यक्रमे वन्दे मातरम् आधारितं 'कॉफी टेबल बुक' तथा च डॉ. सर्वपल्लीराधाकृष्णन् महोदयस्य आधारितं बहुभाषीयं काव्यसङ्ग्रहं विमोचितम्। समारोहस्मिन् हिमाचलप्रदेशविश्वविद्यालयस्य कुलपतिः प्रो. महावीरसिंहः, हिमाचलप्रदेश-राष्ट्रियविधिविश्वविद्यालयस्य कुलपतिका प्रो. प्रीतिसक्सेना, प्रधानमहालेखाकारः पुरुषोत्तमतिवारी, संस्थानस्य सचिवः मेहरचन्दनेगी, देशस्य विविधांशेभ्यः आगताः शिक्षाविदः, राष्ट्रियाध्येतयः, विभिन्नक्षेत्राणां च अनेकाः गण्याः मान्याः प्रमुखाः च उपस्थिता आसन्।

# अस्मिन्नेव वर्षे स्तरोन्नताः भविष्यन्ति सर्वे आयुर्विज्ञानमहाविद्यालयाः - मुख्यमंत्री सुक्खुः

हिमसंस्कृतवार्ताः — शिमला ।मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू महोदयेन स्वास्थ्यविभागस्य समीक्षा-उपवेशनस्य अध्यक्षतां कुर्वता निर्दिष्टं यत् राज्यस्य सर्वे चिकित्सा-महाविद्यालयाः अस्य वर्षस्य अन्तम् यावत् अत्याधुनिक-चिकित्सोपकरणैः सुसज्जिताः विधास्यन्ते, येन प्रदेशस्य जनेभ्यः राज्ये एव श्रेष्ठाः स्वास्थ्यसेवाः उपलभ्येरन्। मुख्यमन्त्रिणा प्रोक्तं यत् स्वास्थ्यविभागे कर्मचारिणां न्यूनतां दूरीकर्तुं राज्यसर्वकारेण सहस्रशः पदेषु नियुक्तयः कृताः सन्ति। तेन प्रतिपादितं यत् 'एम्स' (AIIMS) नवदेहली इत्यस्य स्तर-आधारेण सर्वकारः स्वास्थ्यसंस्थानेषु अत्याधुनिक-सौकर्याणि उपलब्धं कारयति, येन रुग्णेभ्यः सुचारु-उत्कृष्ट-स्वास्थ्यसेवाः सुनिश्चिताः जायन्ते। सुक्खू महोदयेन कथितं यत् डॉ. राजेन्द्रप्रसाद-राजकीय-चिकित्सामहाविद्यालयः (टांडा), डॉ. राधाकृष्णन्-राजकीय-चिकित्सामहाविद्यालयः (हमीरपुरम्) तथा च अटल-इन्स्टीच्यूट-ऑफ-मेडिकल-सुपर-स्पैशियलिटी-आयुर्विज्ञानम् (चमियाणा) इत्येतेषु स्थाप्यमानानाम् अत्याधुनिक-परीक्षण-प्रयोगशालानां कृते सर्वकारेण ७५ कोटिरूप्यकाणि प्रसारितानि सन्ति।

क्रमशः चतुर्थे पृष्ठे....

# HP MONSOON SEASON- क्यू.आर.टी. (QRT) आपदाप्रबन्धनदलाश्च २४ होराः उच्चसतर्कतायाम्, पुलिसमुख्यालयेन प्रसारिताः निर्देशाः



**हिमसंस्कृतवार्ताः- शिमला।** मानसून-ऋतौ सम्भाव्य-प्राकृतिक-आपद्भ्यः जनानां पर्यटकानां च सुरक्षां सुनिश्चितां विधातुं हिमाचलप्रदेश-पुलिसमुख्यालयेन सर्वान् पुलिसाधीक्षकान् (एसपी-महोदयान्) प्रति विस्तृताः दिशानिर्देशाः प्रसारिताः। पुलिस-महानिदेशक- कार्यालयस्य पक्षतः प्रसारितायाम् उपदेशिकायां साहाय्यरक्षणकार्याणि प्रभावशालीनि विधातुं, विधिव्यवस्थां स्थापयितुं, सङ्कटपूर्णेषु क्षेत्रेषु च विशेषनिरीक्षणं कर्तुं निर्देशाः दत्ताः सन्ति। अस्य अन्तर्गतं मण्डलस्तरे निर्मितानि त्वरितप्रतिक्रिया- दलादि आपदाप्रबन्धनदलादि च अहोरात्रं (२४ घण्टाः) उच्चसतर्कतायाम् स्थापयिष्यन्ते।

## नदी-उपनदानामन्तिके रीलनिर्माणं फोटोग्राफी च प्रतिबन्धिता

पुलिसमुख्यालयेन सर्वैः मण्डलैः स्वस्वक्षेत्रेषु प्रवहन्तीनां नदीनाम्, उपनदीनां, प्रपातानां (झरनों) भूस्खलन-सम्भाव्यस्थलानां च परिचयं कृत्वा तत्र विशेषनिरीक्षणं कर्तुम् आदेष्टाः। एतादृशेषु स्थानेषु सचेतनाफलकानि स्थापयिष्यन्ते आवश्यकतानुसारं च अतिरिक्त-आरक्षिबलस्य नियुक्तिः विधास्यते। एतत् सुनिश्चितं करिष्यते यत् कोऽपि जनः, विशेषतः पर्यटकाः, तीव्रप्रवाहयुक्तानां नदी-उपनदीनां च तटे रीलनिर्माणाय, छायाचित्रग्रहणाय (फोटोग्राफी), स्टण्ट-करणाय वा न प्राप्नुयुः। उपदेशिकायां कथितं यत् सर्वैः पुलिसाधीक्षकैः गृहकल्याणविभागेन (होमगार्ड), स्थानीय-प्रशासनेन, राष्ट्रिय- राज्य- आपदाप्रतिक्रियाबलेन (NDRF/SDRF) तथा स्थानीयतरणदलैः साकं श्रेष्ठः समन्वयः स्थापनीयः भविष्यति।

नियमावहेलनां कुर्वद्भिः पर्यटकैः सह दृढतया व्यवहरिष्यते मार्गावरोधे, प्रवाहे (बाढ़), भूस्खलने, मेघविस्फोटादिषु आपत्कालीनस्थितिषु सद्यः एव रक्षण-साहाय्य-अभियानस्य आरम्भेण सह प्रत्येकस्याः घटनायाः सूचना आरक्षिनियन्त्रणकक्षं (पुलिस कंट्रोल रूम) प्रति सद्यः प्रापयितुम् अपि अनिवार्यं विहितम्। आरक्षिमुख्यालयेन मानसूनकाले नियमावहेलनां कृत्वा कोलाहलं, स्टण्टबाज़ीम् अथवा सङ्कटपूर्णेषु स्थानेषु वीडियो- रीलनिर्माणं च कुर्वद्भिः पर्यटकैः सह दृढतया वैधानिक-कार्यविधिं कर्तुम् आदेष्टाः। मण्डल-आरक्षिदलेभ्यः स्वकीयेषु आधिकारिक- सामाजिक- माध्यमेषु (सोशल मीडिया) सामुदायिकसमूहेषु च ऋतोः सचेतना, मार्गावरोधः, यातायातव्यवस्था, वैकल्पिकमार्गाणां च नियमितसूचना प्रकटीकर्तुम् अपि कथितम्, येन स्थानीयजनेभ्यः पर्यटकेभ्यश्च समये एव शुद्धा सूचना प्राप्नुयात् कस्यापि अप्रियघटनायाः च रोधं भवेत्। प्रदेशपुलिसमहानिदेशकेन अशोक तिवारिणा ज्ञापितं यत् मानसूनकाले समये सूचना, श्रेष्ठः समन्वयः, त्वरितप्रतिक्रिया च प्राकृतिक- आपद्भ्यः प्रभावं न्यूनीकर्तुं शक्नुवन्ति। अस्मिन्नेव उद्देश्यात् सर्वे जनपदाः निरन्तरं सर्तकाः भवितुं, कस्यामपि आपत्स्थितौ सम्मुखीकरणाय आवश्यक- संसाधनानां मानवबलस्य च सज्जतायै निर्दिष्टाः सन्ति।

# "गृहे गृहे संस्कृतम्" योजनायाः जुलाईमासीयसत्रस्य अन्तर्जालीयोद्घाटनम्

## "गृहे गृहे संस्कृतम्" योजना संस्कृतभाषायाः संरक्षकरूपेण निरन्तरं कार्यं करोति — योजना-समन्वयकः



**लखनऊ, १० जुलाई २०२६।** उत्तरप्रदेशशासनस्य स्वायत्तशासिना उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चाल्यमानायाः "गृहे गृहे संस्कृतम्" योजनायाः अन्तर्गतं संस्कृतभाषाशिक्षणकक्षाणां जुलाईमासीयानां द्वादशदिवसीयानाम् ऑफलाइन-शिविराणाम् उद्घाटनं ऑनलाइन-माध्यमेन शुक्रवासरे सम्पन्नम्। अस्मिन् कार्यक्रमे प्रदेशस्य प्रायः त्रयस्त्रिंशत् जनपदेभ्यः सम्बद्धानां पञ्चचत्वारिंशत् शिक्षणकेन्द्राणाम् सहभागिता अभवत्।

अयं कार्यक्रमः संस्थानस्य कार्यकारी-अध्यक्षस्य मनीषचौहान-महोदयस्य तथा निदेशकस्य प्रेमेन्द्रकुमारगुप्त-महोदयस्य निर्देशनान्तर्गतं आयोजितः। कार्यक्रमे योजनाप्रभारी भगवानसिंहचौहानः तथा समन्वयकः डॉ. अनिलगौतमः अपि उपस्थितौ आस्ताम्।जनपदे जौनपुरे स्थिते राममनोहरलोहिया-पब्लिक-विद्यालये प्रधानाध्यापकः डॉ. अरविन्दकुमारः बालकेभ्यः संस्कृतभाषायाः महत्त्वं विवृण्वन् संस्कृतसंभाषण-अधिगमाय प्रेरणाम् अददात्। शिविरे संस्थानेन प्रेषिता शिक्षिका पूनमसिंह-महोदया उक्तवती—"अयं शिविरः केवलं कार्यक्रमः नास्ति, अपितु संस्कृतं ज्ञातुं, वक्तुं, आनन्देन सह संस्कृतेन सम्बद्धु च एकः सुअवसरः अस्ति।"तदनन्तरं डायरेक्ट-कैप्टन वी. पी. सिंह-महोदयः उक्तवान्—"संस्कृतम् भारतस्य आत्मा, संस्कृतेः तथा ज्ञानपरम्परायाः आधारशिला अस्ति। संस्कृतभाषा अस्मान् स्वमूलैः, प्राचीनज्ञानेन, भाषाशुद्ध्या, नैतिकमूल्यैः, भारतीयसंस्कृत्या च सह सम्बध्नाति।"योजनायाः समन्वयकः डॉ. अनिलगौतमः स्वीयसम्बोधने उक्तवान् यत् संस्कृतभाषायाः व्यवहारक्षेत्रे प्रवर्तनस्य अद्य अत्यन्तावश्यकता वर्तते। "गृहे गृहे संस्कृतम्" योजना संस्कृतभाषायाः संरक्षकरूपेण निरन्तरं कार्यं करोति। अस्याः योजनायाः अन्तर्गतं कार्यरताः सर्वे प्रशिक्षकाः भाषायाः संवर्धने प्रचार-प्रसारे च महतीं भूमिकां निर्वहन्ति।

तेन एतदपि प्रतिपादितं यत् संस्कृतशिक्षणं केवलं व्याकरणपर्यन्तं न सीमितव्यं, अपितु तत् संवादैः, कथाभिः, गीतैः, अभिनयेन, क्रीडाभिः, तकनीकीमाध्यमैः च सह सम्बद्धं करणीयम्।कार्यक्रमस्य संचालनं प्रांजलः अकरोत्। सरस्वती-वन्दना प्रशिक्षिका खुशबू-महोदया इत्यनया प्रस्तुतिता, तथा संस्थान-गीतिका गीता-वशिष्ठ-महोदया इत्यनया गीता। अन्ते प्रशिक्षिका कंचन-महोदया कल्याणमन्त्रेण कार्यक्रमस्य समापनम् अकरोत्।अस्मिन् अवसरे विद्यालयस्य प्रबन्धकः श्री कैलाशयादवः, प्रधानाचार्यः डॉ. अरविन्दकुमारः, डायरेक्टरः वी. पी. सिंहः, शिक्षकाः ओमप्रकाशयादवः, प्रभातयादवः, अभयसिंहः, शिक्षिकाः ज्योतियादव-महोदया, अर्पितासिंह-महोदया, स्वातिसिंह-महोदया, पुष्पा-महोदया, संजययादवः, जे. एन. सर् तथा बहवः छात्राः छात्राश्च उपस्थिताः आसन्।

**तृतीये पृष्ठादग्रे** तेन उक्तं यत् इन्दिरागान्धी-चिकित्सामहाविद्यालये (IGMC शमला) 'पी.ई.टी. स्कैन' (PET Scan) यन्त्रं स्थापितं वर्तते तथा च टांडा-हमीरपुर-चिकित्सामहाविद्यालयानां कृते पी.ई.टी. स्कैन-यन्त्राणां क्रयणप्रक्रिया प्रचलति। तेन संसूचितं यत् विभिन्नानां पैरामेडिकल-श्रेणीनां ७१ पदानि तथा ५० कनिष्ठ-कार्यालय-सहायकानां (JOA IT) पदानि पूरयितुं प्रक्रिया अग्रे सरति। एतदतिरिच्य पैरामेडिकल-श्रेणीनां १६२ नूतनानि पदानि स्वीकृतानि सन्ति। मुख्यमन्त्रिणा प्रतिपादितं यत् चिकित्सामहाविद्यालयेषु अध्ययनरतेभ्यः विद्यार्थिभ्यः श्रेष्ठं शैक्षणिकवातावरणं प्रदास्यते तथा च प्रत्येकस्मिन् गणे (बैच) ६० विद्यार्थिनां सङ्ख्या सुनिश्चिता विधास्यते। तेन कथितं यत् प्रदेशसर्वकारेण आई.जी.एम.सी. शिमलायां त्रयाणां व्याख्यान-रङ्गमञ्चानां (लेक्चर थिएटर) एकस्य परीक्षाभवनस्य च निर्माणाय ५.७६ कोटिरूप्यकाणि स्वीकृतानि। एतदतिरिच्य टांडा-चिकित्सामहाविद्यालये व्याख्यानरङ्गमञ्चस्य निर्माणार्थम् अतिरिक्त-१४.१३ कोटिरूप्यकाणां प्रावधानं कृतम् अस्ति। उपवेशने महाधिवक्ता अनूपरतनः, स्वास्थ्यविभागस्य प्रधानसचिवः एम. सुधा देवी, मुख्यमन्त्रिणः सचिवः आशीषसिंहमारः, राष्ट्रियस्वास्थ्यमिशनस्य (NHM) मिशन-निदेशकः प्रदीपठाकुरः, विशेषसचिवः डॉ. अश्वनीकुमारशर्मा, स्वास्थ्यसेवा-निदेशकः डॉ. गोपालबेरी विभागस्य अन्ये वरिष्ठाधिकारिणश्च उपस्थिताः आसन्।

## चमियाणा-क्षेत्रे ६६ कोटिरूप्यकैः निर्माणाधीनौ द्वौ अतिरिक्त-खण्डौ

मुख्यमन्त्रिणा प्रतिपादितं यत् ए.आई.एम.एस.एस. (AIMSS) चमियाणा-क्षेत्रे २३.७५ कोटिरूप्यकाणां निर्माण-मूल्येन 'क्रिटिकल ब्लॉक' तथा च ४२ कोटिरूप्यकाणां व्ययेन अतिरिक्त-खण्डस्य (ब्लॉक) निर्माणकार्यं प्रगतिपथे वर्तते। तेन अधिकारिणः एतेषु कार्येषु वेगीकरणाय निर्दिष्टाः। राज्यस्य सर्वे चिकित्सामहाविद्यालयाः अत्याधुनिक-आधारभूत-अधोसंरचनाभिः (इन्फ्रास्ट्रक्चर) विश्वस्तरीय-प्रौद्योगिक्या च स्तरोन्नताः क्रियन्ते। सुक्खु महोदयेन प्रोक्तं यत् एतासां परियोजनानां पूर्त्या आवश्यक-मानवसंसाधनानाम् उपलब्ध्या च प्रदेशस्य जनेभ्यः तेषां गृहाणाम् अन्तिके एव श्रेष्ठाः स्वास्थ्यसेवाः प्राप्स्यन्ते।



## लौकिकन्यायकोशः
# कान्तारन्यायः

कयोश्चित् द्वयोः स्वतन्त्ररीत्या प्रवासः आरब्धः। प्रवासकाले मध्ये कश्चन अरण्यभागः प्राप्तः। द्वयोरपि भयं भवति। अतः परस्परं मैत्री कल्पयित्वा अरण्ये मार्गम् अन्विष्यतः। अरण्यभागे अतिक्रान्ते पुनः द्वयोरपि पृथक् पृथगेव प्रवासो भवति। एवं केनापि निमित्तेन मैत्री घटिता चेत् निमित्तानन्तरं सा स्वयं नश्यति।

**डा. वर्षा प्रकाश टोणगांवकरपुणे, महाराष्ट्रम्**

## तव स्तुतिगाने मधुरस्पन्दने धन्यं भूयात् मे जीवनम्
### (जगन्मयश्रीजगन्नाथदेवमुद्दिश्य स्तुतिप्रणतिनतिगीतिः)



**स्थायी/ध्रुवपदम् -**

तव स्तुतिगाने मधुरस्पन्दने धन्यं भूयात् मे जीवनम् ।।

**अन्तराः (पद्यानि) -**

श्रीजगन्नाथ हे श्रीक्षेत्रे राजसे महादेव जगन्मय
अनादे अनन्त पुरुषोत्तम हे सर्वदेवसमन्वय
तव कृपाबले संसारश्चलति सर्वसुखशान्तिमयः
प्रणतिप्रार्थना गृहाण हे प्रभो कृपामय कृपामय ।१।
तव पदसेवा मम संवेदना स्तुतिगाने विभावना
नित्यकर्मध्याने मधुरस्पन्दने तदेव हृदयार्चना
श्रीजगन्नाथ हे सुहृन्मय प्रभो तव दयाप्रवहणम्
हरतु मेऽज्ञानम्
अशान्ति-दुःखता-रोग-शोकविदाहनम् ।२।
तव नाम सदा संकीर्त्य यातु हे ममेदं मर्त्यं जीवनम्
भक्तभक्तिरतिः त्वयि स्तुतिमतिः भवतु आनन्दायनम्
त्वं तीर्थसेवा द्वारिका मथुरा प्रीतिसुधावृन्दावनम्
तव नाम जप्त्वा पीयूषमास्वाद्य आहसतु मे जीवनम् ।३।
महादेव महाप्रभो जगन्मय त्वमेवासि शान्तब्रह्म
त्वं निराकारः,त्वमेव साकारः,नानारूपविभावनः
भोजनमासनं त्वमेव भाषणं सुप्रभातसायन्तनम्
तव स्तुतिगाने मधुरस्पन्दने धन्यं भूयात् मे जीवनम् ।४।
त्वं शान्तिः प्रीतिः मधुरसङ्गतिः जीवनजीविकागीतिः
त्वया सह गतिः प्रणतिः विनतिः अपि भक्तियुता मतिः
श्रद्धासुमनसं समर्प्य करोमि तव पदे भक्तिनतिम्
दयासागर हे तव स्नेहजले मनसि भर मे शान्तिम् ।५।
त्वं चित्तानलः आस्पृहाप्रबलः अकूपारकृपाजलः
जीवनजञ्जाले संसरणानले त्वमेवासि मे सम्बलः
कलेन बलेन वापि कौशलेन कल्याणं कुरु मे चिरम्
तव रूपच्छविः सुकविता भुवि नन्दयतु ममायनम् ।६।
कृपाजलराशिः जीवनसन्तोषी प्रवर्षतु मयि चिरम्
सन्तुष्य हृदयं कुरु मधुमयं मामकजीविकाचयम्
उद्धर उद्धर कृपामयकर शुभाशिषा आनन्दय
विपदं निरस्य जीवं मे संभृत्य शुभालोके विभासय
विपदं निरस्य जीवं मे संभृत्य शुभालोके विभासय
विपदं निरस्य जीवं मे संभृत्य शुभालोके विभासय ।७।

**रचयिता - आचार्यः श्रीरुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः**

## ब्रह्मपुत्रनद्यां चीनदेशस्य जलबन्धेन विनाशस्य सचेतना

चीनदेशः तिब्बत-क्षेत्रे 'यारलुंग त्सांगपो' नद्यां संसारस्य बृहत्तमं जलविद्युत्-बन्धं (हाइड्रोपावर डैम) निर्माति, यस्य विरोधं भारतदेशः बहुदिनेभ्यः करोति। अधुना अस्य प्रकल्पस्य (प्रोजेक्ट) विरुद्धं चीनदेशस्य अन्तः अपि स्वराः उत्थिताः सन्ति। एषः प्रकल्पः भारतस्य अरुणाचलप्रदेशस्य सीमान्ततः केवलं ५० किलोमीटर दूरे अस्ति। तिब्बत-क्षेत्रस्य इयं त्सांगपो नदी भारते 'ब्रह्मपुत्र नदी' इति नाम्ना ज्ञायते। शी जिनपिंग महोदयस्य वैज्ञानिकैः सचेतना दत्ता यत् अस्य जलबन्धस्य निर्माणेन भूकम्पस्य, भूस्खलनस्य (लैंडस्लाइड) च सङ्कटं वर्धिष्यते। चीनदेशस्य सरकारी-स्वामित्वयुक्तस्य 'चाइना जियोलॉजिकल सर्वे' इत्यस्य अनुसन्धानं तत्रत्ये 'सेडिमेंट्री जियोलॉजी एंड टेथियन जियोलॉजी' इति पत्रिकायां प्रकाशितम् अभवत्।



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य एका विचित्रा वार्ता मया श्रुता। एकेन भाटकयान-चालकेन धूमपानं कुर्वतः प्रवासिनः यात्रा निरस्ता। तेन उक्तं यत् सः तस्य सेवकः नास्ति इति।

**काव्या-** नमस्ते नन्दिनि। सत्यम्, भाटकयान- चालकेन उचितं कृतम्। नियमपालनं सर्वेषाम् आवश्यकम् अस्ति। द्वितीया वार्ता अपि ईदृशी एव अस्ति। एकेन भाटकीकृत- अतिथिगृहपतिना दुष्टाः अतिथयः प्रकटीकृताः। तेन क्रुद्धेन उक्तं यत् "एषः विश्रामगृहकक्षः नास्ति" इति। तैः अतिथिभिः गृहं सर्वथा मलिनीकृतम्।

**नन्दिनी-** आम्, अन्यस्य गृहस्य आदरः करणीयः। जनैः शिष्टाचारः विस्मृतः। तृतीया वार्ता पुण्यपत्तनात् अस्ति। तत्र अतिवृष्टेः समये एकेन कर्मचारिणा गृहात् कार्यं कर्तुं प्रार्थना कृता। किन्तु तस्य प्रबन्धकेन सा प्रार्थना प्रत्याख्याता। तेन उक्तं यत् "भाटकयानं स्वीकृत्य आगच्छतु" इति। अनेन अन्तर्जाले जनाः बहु क्रुद्धाः जाताः।

**काव्या-** एषः प्रबन्धकः अति निष्ठुरः अस्ति। आपत्काले अपि तेन सहानुभूतिः न दर्शिता। चतुर्थी वार्ता अपि उद्योगसम्बद्धा अस्ति। एका संस्था कार्य-प्रस्तावं दत्तवती अस्ति। किन्तु यदा अभ्यर्थिना कार्य-समयस्य विषये स्पष्टता याचिता, तदा तया संस्थया सः कार्य-प्रस्तावः एव निरस्तः कृतः।

**नन्दिनी-** एतत् तु अतीव अन्याय्यम्। प्रश्नकरणं तु प्रत्येकस्य अभ्यर्थिनः अधिकारः अस्ति। ईदृशी प्रवृत्तिः निन्दनीया। अद्यतनवार्ताः अत्रैव समाप्यन्ते। धन्यवादः। पुनर्मेलिष्यामः।

# फीफा विश्व कपः स्पेन-फ्रांस देशौ सेमीफाइनल-चक्रे प्रविष्टौ



### स्पेन-देशेन बेल्जियम-देशः २-१ इत्यङ्कैः पराजितः

फीफा-विश्वचषके (फीफा विश्व कप) स्पेन-देशेन बेल्जियम-देशः २-१ इत्यङ्कैः पराजित्य सेमीफाइनल-चक्रे (उपान्त्यचरणे) स्थानं सुरक्षितं कृतम्। लॉस एंजिलिस नगरस्य इंगलवुड क्षेत्रे क्रीडिते अस्मिन् द्वितीये क्वार्टर-फाइनल (पादपूर्ण) दिवसे प्रथमार्ध-समयपर्यन्तं यावत् उभौ दलौ १-१ इति समान-स्थितौ आस्ताम्। स्पेन-दलस्य कृते विजयी गोल-प्रहारः मिकेल मेरिनो महोदयेन ८८ तमे निमेषे (मिनट) कृतः। अस्मात् पूर्वं फ्रांस-देशेन प्रथमे क्वार्टर-फाइनल चक्रे मोरक्को-देशं २-० इत्यङ्कैः पराजित्य उपान्त्यचरणे प्रवेशः प्राप्तः आसीत्।

### फ्रांस-देशस्य विजयः, एम्बाप्पे महोदयस्य च कीर्तिमानम्

फ्रांस-देशेन मोरक्को-देशं २-० इत्यङ्कैः पराजित्य फुटबॉल-विश्वचषकस्य उपान्त्यचरणे स्थानं प्राप्तम्। दलेन निरन्तरं तृतीयवारं सेमीफाइनल-चक्रे प्रवेशः लब्धः। इतः पूर्वं फ्रांस-दलं २०१८ तथा २०२२ तमस्य वर्षस्य अन्तिम-क्रीडायां (फाइनल) प्रविष्टं भूतम्। प्रथमार्ध-समये पेनल्टी-अवसरं त्यक्तवान् फ्रांस-दलस्य नायकः (कप्तान) किलियन एम्बाप्पे द्वितीयार्धस्य ६० तमे निमेषे प्रथमं गोल-प्रहारं कृतवान्। ततः षट् निमेषानन्तरं उस्मान डेम्बेले महोदयेन द्वितीयः गोल-प्रहारः कृत्वा फ्रांस-दलस्य विजयः सुनिश्चितः कृतः।

**विशेषः:** अस्मिन् स्पर्धा-महोत्सवे एम्बाप्पे महोदयस्य अधुना अष्ट गोल-प्रहाराः संजाताः। अनेन सः अर्जेन्टिना-देशस्य लियोनेल मेसी महोदयस्य समानतां कृतवान्। तथापि, त्रयाणाम् 'असिस्ट' (सहायक-प्रहाराणाम्) बलेन एम्बाप्पे महोदयः 'गोल्डन बूट' इति पुरस्कारस्य स्पर्धायाम् अग्रगामी अस्ति, यतो हि मेसी महोदयस्य नाम्नि अष्ट गोल-प्रहाराः एकः 'असिस्ट' च अस्ति। सर्वान् विश्वचषकान् संमिल्य एम्बाप्पे महोदयः अधुना यावत् २० गोल-प्रहारान् कृतवान् अस्ति। अपरपक्षे, मोरक्को-देशस्य पराजयेन सह अस्मिन् महोत्सवे अफ्रीका-महाद्वीपस्य अन्तिमं दलमपि बहिर्भूतम्।



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतं मधुरं सदा - ५५
### (व्याकरणचिन्तनम्)

विशेष्यम् - नाममात्रं विशेष्यम् उच्यते । यथा - वृक्षः, वस्त्रम्, मानवः, पक्षी, रामः, सीता, --- - इत्यादि।

विशेषणम् - यत् विशेष्यपदस्य दोषः, गुणः, परिमाणः, अवस्था, सङ्ख्या इत्यादिकं निर्दिशति, तत् विशेषणम् । यथा - सुन्दरः बालकः । सुन्दरी बालिका । सुन्दरं पुष्पम् ।

अत्र सुन्दरशब्दः विशेषणम् ।

विशेषणं चतुर्विधम् - क) गुणवाचकम् - धार्मिकः पुरुषः। सुशीला नारी । पीतं वस्त्रम् ।

ख) परिमाणवाचकम् - प्रभूतः अर्थः । अधिका सम्पत् । प्रचुरं जलम् ।

ग) सङ्ख्यावाचकम् - त्रयः छात्राः। द्वे बालिके । पञ्च पुष्पाणि ।

घ) वस्तु/व्यक्तिवाचकम् - अयं बालः। इमाः महिलाः। तानि फलानि। स्वाभाविकतया विशेषणपदं विशेष्यपदस्य लिङ्गविभक्तिवचनानि अनुसरति।

१) यदा एकस्मिन्नेव वाक्ये भिन्नलिङ्गयुतानि द्वित्राणि विशेष्यपदानि भवेयुः, तर्हि तत्र पुंस्त्रियोर्मध्ये पुंवाचकविशेषणं ग्राह्यं, यथा - पिता माता च पूजनीयौ । किशोरः किशोरी च सुन्दरौ । नराः नार्यः च धार्मिकाः

२) एकस्मिन् वाक्ये यदि बहुधा विशेष्यपदानि भवेयुः, तेषु किञ्चन एकं क्लीबलिङ्गयुतं स्यात्, तर्हि तस्य विशेषणपदं क्लीबलिङ्गस्य एकवचने/बहुवचने वा भवति। यथा -रमेशस्य माता, पिता, कलत्रं च सुन्दराणि/सुन्दरं वा । उत्पलानि च सरोवरश्च, नदी च तत्र शोभनानि/शोभनं वा ।

३) कदाचित् विधेयपदम् उद्देश्यपदस्य लिङ्गवचनादिकं न स्वीकरोति । यथा - नक्षत्राणां भूषणं चन्द्रः। धर्मविषये वेदाः प्रमाणम् ।

४) यानि पदानि स्वलिङ्गं न कदापि त्यजन्ति, तानि अजहल्लिङ्गपदानि उच्यन्ते । एतानि विशेषणपदान्येव । यथा - प्रमाणम्, पदम्, निदानम्, आस्पादम्, स्थानम्, मूलम्, पात्रम्, कारणम्, भाजनम् इत्यादि । यथा - गुणाः पूजास्थानं गुणिषु । स एकः परमेश्वरः कारणं सर्वभूतानाम् इत्यादि ।